# Paramartha Dvadashika

# પરમાર્થદ્વાદશિકા

## Document Information

Text title : Paramartha Dvadashika by Abhinavagupta

File name : paramArthadvAdashikA.itx

Category : major_works, abhinavagupta

Location : doc_z_misc_major_works

Author : Abhinavagupta

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description-comments : from Abhinavastotravali

Latest update : December 14, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 15, 2021

*sanskritdocuments.org*

# પરમાર્થદ્વાદશિકા

શાન્તિં સમ્ભજ નિત્યમલ્પવચનૈર્જલ્પક્રમં સંહર
    તત્સંહારગમેન કિં કથમિદં કોઽસીતિ મા ચીક્લૃપઃ ।
ભાવાભાવવિભાગભાસનતયા યદ્ભાત્યભગ્નક્રમં
    તચ્છૂન્યં શિવધામ વસ્તુ પરમં બ્રહ્માત્ર કોઽર્થગ્રહઃ ॥ ૧॥

યદ્યતત્ત્વપરિહારપૂર્વકં તત્ત્વમેષિ તદતત્ત્વમેવ હિ ।
યદ્યતત્ત્વમથ તત્ત્વમેવ વા તત્ત્વમેવ નનુ તત્ત્વમીદૃશમ્ ॥ ૨॥

યદ્યદ્ભાતિ ન ભાનતઃ પૃથગિદં ભેદોઽપિ ભાતીતિ ચેત્
    ભાને સોઽપિ ન ભાતિ કિં જહિ તતસ્તદ્ભઙ્ગિભઙ્ગગ્રહમ્ ।
સ્વપ્ને સ્વપ્નતયા પ્રથાં ગતવતી ક્રીડૈવ નો ભીતિકૃ-
    ચ્છસ્ત્રાઘાતજલાવપાતહુતભુઙ્નિર્ઘાતબન્ધાદિકમ્ ॥ ૩॥

જ્ઞાનક્રિયાકલનપૂર્વકમધ્યવસ્યે-
    દ્યદ્યદ્ભવાન્ કથય કોઽસ્ય જડાદ્વિશેષઃ ।
સ્ફૂર્જન્જડોઽપિ ન કિમદ્વયબોધધામ
    નિસ્સીમનિત્યનિરવગ્રહસત્યરૂપમ્ ॥ ૪॥

ભાવાનામવભાસકોઽસિ યદિ તૈર્મોહઃ કિમાતન્યતે
    કિં તે તદ્યદિ ભાન્તિ હન્ત ભવતસ્તત્રાપ્યખણ્ડં મહઃ ।
નોચેન્નાસ્તિ તદેવમપ્યુભયથા નિર્વ્યાજનિર્યન્ત્રણા-
    ત્રુટ્યદ્વિભ્રમનિત્યતૃપ્તમહિમા નિત્યં પ્રબુદ્ધોઽસિ ભોઃ ॥ ૫॥

દૃષ્ટિં બહિઃ પ્રહિણુ લક્ષ્યપથાતિરિક્તં
    સ્યાદ્ભૈરવાનુકરણં વત વઞ્ચનેયમ્ ।
નિર્દ્વન્દ્વબોધગગનસ્ય ન બાહ્યમસ્તિ
    નાભ્યન્તરં નિરવકાશવિકાસધામ્નઃ ॥ ૬॥

વાસનાપ્રસરવિભ્રમોદયે યદ્યદુલ્લસતિ તત્તદીક્ષ્યતામ્ ।

આદિમધ્યનિધનેષુ તત્ર ચેત્ ભાસિ ભાસિ તવ લીયતે જગત્ ॥ ૭॥

મોહો દુઃખવિતર્કતર્કણઘનો હેતુપ્રથાનન્તર-
પ્રોદ્યદ્વિભ્રમશ‍ૃઙ્ખલાતિબહુલો ગન્ધર્વપૂઃસન્નિભઃ ।
દ્વૈતાદ્વૈતવિકલ્પનાશ્રયપદે ચિદ્વ્યોમ્નિ નાભાતિ ચેત્
કુત્રાન્યત્ર ચકાસ્તુ કાસ્તુ પરમા નિષ્ઠાપ્યનેકાત્મના ॥ ૮॥

સ્વપ્ને તાવદસત્યમેવ સરણં સૌસુપ્તધામ્નિ પ્રથા
નૈવાસ્યાસ્તિ તદુત્તરે નિરુપધૌ ચિદ્વ્યોમ્નિ કોઽસ્ય ગ્રહઃ ।
જાગ્રત્યેવ ધરાવદર્થનિચયઃ સ્યાચ્ચેત્ ક્ષણે કુત્રચિત્
જ્ઞાનેનાથ તદત્યયેઽપૃથગિદં તત્રાપિ કા ખણ્ડના ॥ ૯॥

યે યે કેઽપિ પ્રકાશા મયિ સતિ પરમવ્યોમ્નિ લબ્ધાવકાશાઃ
કાશા હ્યેતેષુ નિત્યે મહિમનિ મયિ તે નિર્વિભાગં વિભાન્તિ ।
સોઽહં નિર્વ્યાજનિત્યપ્રતિહતકલનાનન્તસત્યસ્વતન્ત્ર-
ધ્વસ્તદ્વૈતાઽદ્વયારિદ્વયમયતિમિરાપારબોધપ્રકાશઃ ॥ ૧૦॥

કાલઃ સઙ્કુલયન્કલાઃ કલયતુ સ્રષ્ટા સૃજત્વાદરા-
દાજ્ઞાયાઃ પરતન્ત્રતામુપગતો મથ્નાતુ વા મન્મથઃ ।
ક્રીડાડમ્બરામમ્બરાશ્રયમિવ સ્વોલ્લેખરેખાક્રમં
દેહાદ્યાશ્રયમસ્તુ વૈકૃતમહામોહે ન પશ્યામિ કિમ્ ॥ ૧૧॥

કઃ કોઽત્ર ભોર્યં કવલીકરોમિ
કઃ કોઽત્ર ભોર્યં સહસા નિહીન્મ ।
કઃ કોઽત્ર ભોર્યં પરબોધધામ-
સચ્ચર્વણોન્મત્તતનુઃ પિબામિ ॥ ૧૨॥

ભવોત્થભયભઙ્ગદઙ્ગદશ‍ૃગાલવિદ્રાવણં
પ્રબોધધુરિધીમતામપિ સકૃદ્યદુદ્દીપનમ્ ।
સુધામગહનાટવીવિહરણાતિતૃપ્યુદ્ભમાદ્
અભેદકરિબૃંહિતં વ્યધિત રમ્યદેવો હરિઃ ॥ ૧૩॥

ઇત્યાચાર્યાભિનવગુપ્તકૃતા પરમાર્થદ્વાદશિકા ભવ્યાયાસ્તુતરામ્ ॥

Encoded and proofread by Ruma Dewan

*Paramartha Dvadashika*

pdf was typeset on December 15, 2021

Please send corrections to *sanskrit@cheerful.com*